# Sample Paper
# Common Annual School Examination-2019

Class-VIII(निष्ठा) Subject- Sanskrit

Time- 2:30 Hrs. M.M.- 50

| Q. No | Description | M.M |
|---|---|---|
| | सामान्य-निर्देशाः -<br>● अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति-<br>खण्डः (क) - अपठितांश-अवबोधनम् - 10 अंक<br>खण्डः (ख) - रचनात्मक-कार्यम् - 8 अंक<br>खण्डः (ग) -अनुप्रयुक्त-व्याकरणम् - 12 अंक<br>खण्डः (घ) - पठितांश-अवबोधनम् - 20 अंक<br>● प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।<br>● सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।<br>● प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः। | |
| 1. | **खण्डः - क**<br>**अपठितांश-अवबोधनम्**<br>अनुच्छेदं पठित्वा यथानिर्देशं प्रश्नानाम् उत्तराणि लिखत-<br>ग्रामे अस्माकं गृहम् अस्ति। गृहस्य अग्रे एकः मार्गः अस्ति। गृहस्य पूर्वस्यां दिशि एका वाटिका अस्ति। वाटिकायां अनेकविधानि पुष्पाणि शाकाश्च सन्ति। अस्माकं गृहे पञ्च प्रकोष्ठाः सन्ति। तेषु प्रकोष्ठेषु एका पाकशाला अपि अस्ति। एकस्मिन् अन्नभण्डारः अस्ति। त्रिषु प्रकोष्ठेषु परिवारस्य जनाः निवसन्ति। अस्माकं गृहे एका दुग्धवती धेनुः अपि अस्ति। पिता कृषिकार्यं करोति।<br>(अ) एकपदेन उत्तरत -<br>i. पिता किं करोति?<br>ii. कस्यां दिशि वाटिका वर्तते?<br>(ब) पूर्णवाक्येन उत्तरत -<br>i. प्रकोष्ठेषु के निवसन्ति ?<br>ii. गृहे कीदृशी धेनुः अस्ति ?<br>(स) यथानिर्देशं प्रश्नान् उत्तरत -<br>i. 'दुग्धवती धेनुः' इत्यनयोः पदयोः किं विशेषणपदम्। | 2x1= 2<br><br>2x2 =4<br><br>4x1=4 |

| | | |
|---|---|---|
| | ii. **'पृष्ठे'** इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत।<br>iii.'एका दुग्धवती धेनुः अपि अस्ति।' अस्मिन् वाक्ये अव्ययपदं चित्वा लिखत।<br>iv. 'वाटिकायाम्' इत्यस्मिन् पदे का विभक्तिः? | |
| 2. | **खण्डः' ख '**<br>**रचनात्मक-कार्यम्**<br>अधःप्रदत्तं चित्रं दृष्ट्वा मंजूषायां प्रदत्तशब्दानां सहायतया रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः लिखत -<br><br>मंजूषा-<br>क्रिकेटखेलम् , कन्दुकम् , गृहम् , क्रीडाक्षेत्रस्य<br>i. इदं .................... चित्रम् अस्ति ।<br>ii. अत्र बालकाः ................. क्रीडन्ति ।<br>iii. अस्मिन् चित्रे एकः बालः ............. क्षिपति ।<br>iv. अस्मिन् चित्रे एकः................ अपि अस्ति ।<br>अथवा<br>मंजूषायां प्रदत्तपदानां सहायतया 'उद्यानम्' इति विषयम् अधिकृत्य चत्वारि वाक्यानि पूरयत -(केवलं दृष्टिबाधित छात्राणाम् कृते)<br>i. उद्याने अनेके ................ भवन्ति।<br>ii. वृक्षाः पर्णैः ..................... च शोभन्ते।<br>iii. जनाः ................ फलानि भक्ष्यन्ति।<br>iv. पुष्पेषु .................. गुञ्जन्ति मधुपानं च कुर्वन्ति।<br>मंजूषा -<br>पुष्पैः, वृक्षाणां, भ्रमराः, वृक्षाः, | 4x1=4 |

**3.** मित्राय भगिन्या: विवाहस्य निमंत्रणपत्रम् मंजूषाप्रदत्तपदसाहाय्येन पूरयित्वा पुनः लिखत– **4x1=4**

गाजियाबादत:

दिनाङ्क: ...........

प्रियमित्र सुरेश !

सप्रेम (i)............ ।

अत्र कुशलं तत्रापि सर्वे (ii)............स्युः इति कामये। मित्र! इदं ज्ञात्वा त्वम् अतिप्रसन्नः भविष्यसि यत् मम (iii).........विवाहः जूनमासस्य दशदिनाङ्के अस्ति। तस्मिन् दिवसे गुरुग्रामत: वरयात्रा (iv)......... प्रति आगमिष्यति। अस्मिन् माङ्गलिके अवसरे पञ्चदिनानि पूर्वमेव आगच्छतु इति निवेदनम् अस्ति। अत्र त्वया सहयोगः अपि करणीयः इति मम कामना वर्तते।

तव मित्रम्

......................

**मंजूषा–**

गाजियाबादं , कुशलिन: , भगिन्या:, नमस्ते ,

## खण्ड ‘ ग ’

## अनुप्रयुक्त-व्याकरणम् ( 12 )

**4.** मंजूषायां प्रदत्तानां उचितकर्तृ- कर्म–क्रियापदानि मेलयित्वा वाक्यनिर्माणं कुरुत– **4x1=4**

| कर्ता | कर्म | क्रिया |
|---|---|---|
| त्वम् | क्रिकेटम् | क्रीडन्ति । |
| सा | गीतं | पठति । |
| अहम् | वार्तालापं | गायसि। |
| युवका: | पुस्तकम् | करोमि। |

**5.** सन्धिं / विच्छेदं वा कुरुत– **4x1=4**

(i) महा + इन्द्र: =

(ii) वाचन + आलय: =

(iii) हरेन्द्र: =

(iv) कवीन्द्र: =

**6.** रेखांकितपदेषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा लिखत । **2x1=2**

(i) दिनेश: विद्यालये **पठ् +क्त्वा** गृहं गच्छति।

(ii) राजेश: नगरम् **गम्+तुमुन्** सिद्धः भवति ।

| | | |
|---|---|---|
| 7. | अधोलिखितपदेषु उपसर्गम् विभज्य लिखत ।<br>(i) विहरति –<br>(ii) पराधीनः – | 2x1=2 |
| 8. | **खण्ड –' घ '**<br>**पठितांश-अवबोधनम् (20)**<br>अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणिसंस्कृतेन लिखत।<br>सामाजिककुरीतीनां सावित्री मुखरं विरोधम् अकरोत्। विधवानां शिरोमुण्डनस्य निराकरणाय सा साक्षात् नापितैः मिलिता। फलतः केचन नापिताः अस्यां रूढौ सहभागिताम् अत्यजन्। एकदा सावित्र्या मार्गे दृष्टं यत् कूपं निकषा शीर्णवस्त्रावृताः तथाकथिताः निम्नजातीयाः काश्चित् नार्यः जलं पातुं याचन्ते स्म। उच्चवर्गीयाः उपहासं कुर्वन्तः कूपात् जलोद्धरणम् अवारयन्। सावित्री एतत् अपमानं सोढुं नाशक्नोत्। सा ताः स्त्रियः निजगृहं नीतवती। तडागं दर्शयित्वा अकथयत् च यत् यथेष्टं जलं नयत। सार्वजनिकोऽयं तडागः।<br>(अ) एकवाक्येन उत्तरत–<br>(i) सावित्री कस्याः मुखरं विरोधम् अकरोत्?<br>(ii) नार्यः किं पातुं याचन्ते स्म?<br>(ब) पूर्णवाक्येन उत्तरत –<br>(i) विधवानां शिरोमुण्डनस्य निराकरणाय सावित्री कः मिलिता?<br>(ii) सावित्री किं सोढुं नाशक्नोत्?<br>(स) निर्देशानुसारं प्रश्नान् उत्तरत –<br>(i) '**सम्मानम्**' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत।<br>(ii) ' नापितैः' इति पदे का विभक्तिः?<br>(क) चतुर्थी (ख) सप्तमी (ग) तृतीया (घ) षष्ठी | 2x1=2<br>2x1=2<br>2x1=2 |
| 9. | सुपूर्णं सदैवास्ति खाद्यान्नभाण्डं<br>नदीनां जलं यत्र पीयूषतुल्यम्।<br>इयं स्वर्णवद् भाति शस्यैर्धरेयं<br>क्षितौ राजते भारतस्वर्णभूमिः ।।<br>(अ) एकपदेन उत्तरत –<br>(i) भारतस्वर्णभूमिः कुत्र राजते ?<br>(ii) केषां जलं पीयूषतुल्यम् अस्ति ? | 2x1=2 |

| | | |
|---|---|---|
| | (ब) पूर्णवाक्येनउत्तरत -<br>(i) खाद्यान्नभाण्डं कीदृशम् अस्ति ?<br>(ii) इयं धरा कैः स्वर्णवद् भाति?<br>(स) यथानिर्देशम् उत्तरत -<br>(i) 'पृथ्वी' इत्यस्य किं समानार्थकपदम् अस्मिन् श्लोके प्रयुक्तम् ?<br>(ii) **नदीनां**' अस्मिन् पदे का विभक्तिः? | 2x1=2<br><br><br>2x1=2 |
| 10. | निम्नलिखितं श्लोकांशान् योजयत–<br><table><tr><th>(क)</th><th>(ख)</th></tr><tr><td>यं मातापितरौ क्लेशं</td><td>नित्यं वृद्धोपसेविनः।</td></tr><tr><td>अभिवादनशीलस्य</td><td>सर्वमात्मवशं सुखम्।</td></tr><tr><td>सर्वं परवशं दुःखं</td><td>मनः पूतं समाचरेत्।</td></tr><tr><td>सत्यपूतां वदेद्वाचं</td><td>सहेते सम्भवे नृणाम्।</td></tr></table> | 4x1=4 |
| 11. | प्रदत्तानां तद्भवपदानां कृते मञ्जूषातः संस्कृतपदानि चित्वा लिखत–<br>तडागः, क्लेशम्, वृद्धः, निकषा<br>(i) कष्ट –..................<br>(ii) बूढ़ा –..................<br>(iii) तालाब–...............<br>(iv) निकट –.................. | 4x1=4 |